06-06-2021

अनिवार्यपत्रम् ।

शास्त्री II

व्याकरणछात्रहेतवे । रघुवंशमहाकाव्यस्य श्लोकव्याख्या ।

"कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥"

**सन्दर्भः →** प्रस्तुतमिदं पद्यं महाकविकालिदासविरचितस्य 'रघुवंश' महाकाव्यस्य षष्ठसर्गीयेन्दुमतीस्वयंवरवर्णनादुद्धृतमस्ति ।

**अन्वयः →** अन्ये सहस्रशः नृपाः कामं सन्तु (तथापि जनाः) अनेन भूमिं राजवन्तीम् आहुः, नक्षत्रतारासङ्कुला अपि रात्रिः चन्द्रमसा एव ज्योतिष्मती (भवति) ।

**शब्दार्थः व्याकरणञ्च →** अन्ये = अपरे । सहस्रशः = बहवः सैख्याङ्काः । कामं = पर्याप्तं । सन्तु = भवन्तु । अनेन = परन्तपेन । भूमिं = धराम् । राजन्वतीम् → शोभनः राजानः सन्ति अस्या इति राजन्वती, तां । राजन्वतीम् = राजवतीम् । आहुः = कथयन्ति । नक्षत्रताराग्रहसङ्कुला = नक्षत्राणि च ताराश्च ग्रहाश्च तैश्च सङ्कुला = भौमादिग्रहपरिव्याप्ता । अपि = तु । रात्रिः = रजनी । चन्द्रमसा = इन्दुना । एव = हि । ज्योतिष्मती = कान्तिमती ।

**आशयः →** अत्र महाकविः सुनन्दया इन्दुमतीं प्रति परन्तपस्य परिचयविशेषं सदृष्टान्तं वर्णयति । परन्तपः राज्ञः समूहे सर्वश्रेष्ठः अस्ति । तेन साहचर्येण पृथिवी राजति । एकश्चन्द्रः तमो हन्ति न च तारकाः सहस्रशः । रात्रिः चन्द्रमसैव ज्योतिष्मती भवति ।

**विशेषः →** अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, दृष्टान्तालङ्कारः, उपजातिछन्दश्च ।

06-06-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

06-06-21

साहित्य (प्रतिष्ठा) शास्त्री III

अष्टम पत्रम् । मालविकाग्निमित्रम् । श्लोकव्याख्या ।

" इष्टाधिगमनिमित्तं, प्रयोगमेकान्तसाध्यमपि मत्वा ।
संदिग्धमेव सिद्धयै, कातरमाशङ्कते हृदयम् ॥"

यथा उक्तिः कविकुलगुरुकालिदासविरचितस्य मालविकाग्निमित्रम् नाटकस्य चतुर्थेऽङ्के राज्ञः अग्निमित्रस्य विदूषकं गौतमं प्रति ।

अन्वयः → इष्टाधिगमनिमित्तं प्रयोगम् एकान्तसाध्यम् मत्वा अपि सिद्धयै संदिग्धं कातरं हृदयम् आशङ्कते एव ।

शब्दार्थाः व्याकरणानि च → इष्टाधिगमनिमित्तं → इष्टस्य अधिगमः इष्टाधिगमः, तस्य निमित्तम् इष्टाधिगमनिमित्तं = इष्टपदार्थप्राप्तिकारणम् । प्रयोगम् → प्र + √युज् + घञ् = उपायम् । एकान्तसाध्यम् = एकान्तं यथा स्यात् तथा साध्यम् = प्रभूतदृढम् । मत्वा = √मन् + क्त्वा = ज्ञात्वा । सिद्धयै = प्राप्त्यार्थसाधने । कातरम् = निर्बलम् । हृदयम् = चेतः । आशङ्कते = शङ्काम करोति ।

अलङ्कारः → अप्रस्तुतप्रशंसा । तल्लक्षणम् →
" अप्रस्तुतप्रशंसा या सा प्रस्तुताश्रया ।"

छन्दः → आर्या जातिः (पथ्या) । तल्लक्षणम् →
" यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥"

06-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

06-06-21

उपशास्त्री

अनिवार्य प्रथमपत्रम् ।

संस्कृतानुवादः →

विगत कक्षा में मैंने कर्तृपदों की एक ~~सारिणी~~ सारणी प्रस्तुत की थी। संस्कृत भाषा के छः कर्तृपदों को छोड़कर शेष सभी कर्तृपद प्रथमपुरुष के एकवचन, द्विवचन तथा बहुवचन में होते हैं। छः कर्तृपदों में से तीन मध्यमपुरुष के तीनों वचनों में क्रमशः त्वम्, युवाम् तथा यूयम् होते हैं। शेष तीन उत्तम पुरुष के तीनों वचनों में क्रमशः अहम्, आवाम् तथा वयम् होते हैं। प्रथम पुरुष के तीनों वचनों में शेष सभी कर्तृपद आते हैं। सभी कर्तृपदों को लिखना असंभव है। जितना संभव हो सका उतना मैंने लिखा है। छात्रों को अपनी बुद्धि, गुरुजनों से विमर्श तथा परस्पर चर्चा कर अन्य कर्तृपदों का ज्ञान लेना चाहिए। क्रिया पदों (गच्छति, अपठत्, पठिष्यति आदि) को छोड़ कर संस्कृतभाषा के अन्य पदों (शब्दों) में प्रथमा विभक्ति लगी हो तो वे पद कर्तृपद होते हैं। द्वितीया वि० लगने पर कर्म, तृतीया वि० जुड़ी हो तो करण, चतुर्थी वि० जुड़ने पर सम्प्रदान, पञ्चमी वि० लगी हो तो अपादान, सप्तमी वि० जुड़ने से अधिकरण पद का निर्माण होता है। षष्ठी वि० जुड़ने से सम्बन्ध को बतलाने वाले पद बनते हैं। सम्बोधित पदों में प्रथमा वि० ही लगती है। संस्कृत में सम्बन्ध तथा सम्बोधन को कारक नहीं माना गया है। क्यों? "क्रियान्वयीत्वं कारकत्वम्।" कारक पढ़ने के क्रम में इस पर चर्चा होगी।

[signature] 06-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

06-06-2021

शास्त्री प्रथमवर्षम् ।

श्लोकस्य -व्याख्या

"चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥"

पद्यमिदं महाकविश्रीमाघप्रणीतस्य शिशुपालवध-महाकाव्यस्य प्रथमसर्गात् उद्धृतमस्ति । अत्र कविः वर्णयति → यदाकाशात् अवतरन्तं मुनिं नारदं भगवान् श्रीकृष्णः क्रमेण ज्ञातवान् इति ।

अन्वयः → विभुः सः, पुरा त्विषां चयः इत्यवधारितम् । ततः विभाविताकृतिं शरीरीति (अवधारितम्) । (ततः) विभक्तावयवं पुमान् इति (अवधारितम्) । अमुं, क्रमात् नारदः इत्यबोधि ।

शब्दार्थः → विभुः - व्यापकवस्तुतत्त्वनिर्धारणसमर्थः । सः - भगवान् कृष्णः । पुरा - पूर्वम् । त्विषाम् - तेजसाम् । चयः - समूहः । इति - एवम् । अवधारितम् - विनिश्चितम् । ततः - तदनन्तरम् । विभाविताकृतिम् - विमृष्टाकृतिम् । शरीरी - चेतनः प्राणी । विभक्तावयवम् - पृथक्-पृथक् मुखादि - अङ्गम् । पुमान् - पुरुषः । अमुं - व्यक्तिविशेषम् । क्रमात् - क्रमपूर्वकात् । अबोधि - ज्ञातवान् ।

समासः → विभाविताकृतिम् - विभाविता आकृतिः यस्य सः, तम् (बहुव्रीहिः) । विभक्तावयवम् - विभक्ता अवयवा यस्य सः, तम् (बहुव्रीहिः) ।

अलङ्कारः → "काव्यलिङ्गम्", लक्षणम् → "काव्यलिङ्गं हेतोर्वाक्यपदार्थता ।"

छन्दः (वृत्तम्) → 'वंशस्थवृत्तम्', लक्षणम् → "जतौ तु वंशस्थमुदीरितं जरौ ।"

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ
का० सि० द० सं० विश्ववि० दरभङ्गा